International Journal of Sanskrit Research 2018; 4(6): 134-135

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 134-135
© 2018 IJSR
www.anantaajournal.com
Received: 25-09-2018
Accepted: 26-10-2018

डॉ. शिवकुमार मिश्र
संस्कृत विभाग,
कुँवरसिंहमहाविद्यालय,
लहेरियासराय, दरभंगा,
बिहार, भारत

Correspondence
डॉ. शिवकुमार मिश्र
संस्कृत विभाग,
कुँवरसिंहमहाविद्यालय,
लहेरियासराय, दरभंगा,
बिहार, भारत

# संस्कृतराष्ट्रे कालिदासो विशिष्यते

डॉ. शिवकुमार मिश्र

**प्रस्तावना**

शैली रसमयीं नूनम् आदिकाव्यप्रवर्तिता।
सम्पोषकस्तु शैल्याः वै कालिदासो विशिष्यते।।
वागर्थौ सहितौ काव्यं पार्वतीशौराविव।
श्रद्धया सेवितौ नूनं परमानन्द वर्षिणौ।।2।।
एतादृशस्य काव्यस्य सिद्धिप्राप्तो महाकविः।
कालिदासो महासत्त्वः शैवः शाक्तो न संशयः।।3।।
चिन्तनेन स शैवोऽस्ति भाषया शक्त्यु पासकः
शवक्त्या शिवस्य संपर्कान्नवसर्गः प्रजायते।।4।।
निसर्गतश्च तत्काव्यं सूत्रात्मकमुदीरितम्।
न न्यूना नातिरिक्ता च यत्रा भाति पदावली।।5।।
प्रारंभे रघुवंशस्य स्वयं तेन समीरितम्।
मणौ वज्रसमुत्कीर्णे सूत्रास्येवास्तिमे गतिः।।6।।
परिवृत्ति सहत्वं च तत्पदेषु न लक्ष्यते।
शब्द पाकस्य वैशिष्ट्यमिदमेव निगद्यते।।7।।
काव्यस्यात्मा ध्वनिः पूर्वं स्थापितो यो मनीषिभिः।
रसध्वनिश्च तत्रापि प्राधान्येन निरूपितः।।8।।
तत्काव्ये निखिले नूनमासाद्यो रस एव च।
सचेतसा मनुभवः प्रमाणं तत्र सर्वथा।।9।।
सादृश्यमूलका ये वै अलंकारा निरूपिताः ।।
प्राधान्य तेषु सर्वेषु उपमाया न संशयः।।10।।
सर्वत्र संगता तस्य उपमा परिदृश्यते।
नैसर्गिकी नवीना च सोपमेयानुसारिणी।।11।
श्रुतिमूलक धर्मस्य स्मरणेन स्मृतिर्यथा।
सुदक्षिणा तथा मान्या नन्दिन्या अनुगामिनी।।12।।
सुदक्षिणादिलीपान्तर्विद्यमाना च नन्दिनी।
विराजति स्म सन्ध्येव दिनरात्रयन्तरं गता ।।13।।
अहो महाकविर्नूनं कालिदासोऽस्ति सर्वथा।
वैशिष्ट्येन स सर्वत्र स्मृतो दीपशिखा कविः।।14।।
सौन्दर्यवर्णनं तस्योत्प्रेक्षया परिदृश्यताम्।
कुमारसम्भवे गौर्याः सर्वतोऽतिशयं गतम्।।15।।
ब्रह्माण्डे विद्यमानानि समुच्चित्य कृतेव सा।
इत्येवं कविना तेनोत्प्रेक्षिता खलु पार्वती।।16।।
चित्रणं प्रकृतेश्चैव मेघदूते हि दृश्यताम्।
स्वाभाविकं तु सर्वत्र विद्यते नात्र संशयः।।17।।
मेघदूतो हि काव्येऽस्मिन् नायकत्वेन वर्णितः।
नायिका खलु तत्रैव नदीरूपेण वर्णिता।।18।।
मेघस्यच्छायया स्वच्छे पतन्त्या जाह्नवी जले।

अस्थाने संगमस्तेन गंत्रयमुनयोः कृतः।।19।।
तस्माद्गच्छेरिति श्लोके एकस्मिन्नेव सर्वथा।
गत्रयाः कृत्स्नवैशिष्ट्यं संक्षेपेण निदर्शितम्।।20।।
प्रकृतेरपि चान्योऽन्य समवेदनशीलता।
विशेषतश्चतुर्थी अभिज्ञानशाकुन्तले।।21।।
शकुन्तलायै सर्वाणि मण्डनानि यथारूचि।
तरूभिः संप्रदत्तानि तस्याः सौभाग्यशंसिभिः।।22।।
शावको हरिणस्यापि तदीयं वसनांचलम्।
सज्जते स्म भृशं येन तिष्ठति स्म च सा पथि।।23।।
शकुन्तला प्रयासेन दुष्यन्तेन हि संगता।
वनज्योत्स्ना रसालं च तरूश्रेष्ठं समाश्रिता।।24।।
आस्तिक्यमपि सर्वत्र दृश्यते तन्महाकवेः।
श्रृत्ररसकाव्ये हि मेघदूतेऽपि दृश्यताम्।।25।।
जानक्याः स्नानपूते रामगिर्याश्रमे ननु।
यक्षो निवसतिं चक्रे धनदेन वहिष्कृतः।।26।।
उज्जयिन्यां महाकालपूजनं परिवर्णितम्।
अत्यादित्यप्रभत्वेन कार्तिकेयोऽपि वर्णितः।।27।।
एतादृशस्य काव्यस्य वैशिष्ट्येन हि सर्वथा।
रक्षकश्च राष्ट्रस्य कालिदासो विशिष्यते।।28।।
शिवकुमारमिश्रेण चित्रितं सर्वतोमुखम्।
राष्ट्रिय भावना तत्र कालिदासस्य सर्वथा।।29।।